संस्कृत-वार्ता:

16/11/2025

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- प्रधानमन्त्री श्रीनरेन्द्रमोदी गुजरातस्य सूरते भारतस्य प्रथमबुलेटरेलयानपरियोजनायाः दलीयकर्मिभिः सह वार्तालापम् अकरोत् कार्यप्रगतेश्च समीक्षामपि विहितवान्
- उत्तरप्रदेशस्य सोनभद्रजनपदे एकस्याः खानकगुहायाः भूमौ निमज्जनात् एकस्य कर्मिणः मरणं संजातं अपि च दशाधिकजनाः तत्र भूमिसात् संजाताः इति आशङ्क्यते
- छत्तीसगढस्य सुकमाजनपदे सुरक्षाबलैः सह जाते संघर्षे त्रयः माओवादिनः सुरक्षाबलैः मारिताः।
- कोलकात्तायाः ईडनगार्डनक्रीडांगणे पुरुषक्रिकेटनिकषप्रतिस्पर्धायां दक्षिणाफ्रीकादलेन भारतीयदलं प्रथमनिकषस्पर्धायां त्रिंशत्धावनाङ्कैः पराजितम्

<u>प्रधानमन्त्रीबुलेटरेलयानम्</u>

प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना एतस्मिन् विषये बलाघातः कृतः यत् प्रत्येकं भारतवासी एवंविधं चिन्तनं कुर्यात् यत् सः देशस्य विकासस्य किं नवीनं विशिष्टं वा कर्तुं पारयेत्। यदा एतादृशी देशप्रेमभावना भवति तदा सा प्रेरणास्रोतोरूपेणापि जायते, ह्यः श्रीमोदिना सूरते भारतस्य प्रथमबुलेटरेलयानपरियोजनानायाः समीक्षायाः अनन्तरं परियोजनादलेन सह वार्तालापः कृतः, , प्रधानमन्त्रिणा बुलेटरेलयानयोजनायाः तुलना भारतीयान्तरिक्षयात्रया सह कृता, तथा च स्मृतं यत् येन देशस्य प्रथमोपग्रहः प्रक्षेपितः, तादृशः वैज्ञानिकदलं स्मर्यते अपि च तत् दलमपि गौरवम् अनुभवति, सम्प्रति तु भारतेन शताधिकोपग्रहाः प्रक्षेप्यन्ते।

प्रधानमन्त्रिणा परियोजनायाः समीक्षणं कृतं तथा च यथाकालं पूर्णता भवेत् इत्यपि संकल्पितम्, कार्यकर्तृभिः श्रीमोदी आश्वासितं यत् परियोजनाः काठिन्यं विना समीचीनरूपेण प्रवर्तते, श्रीमोदिना तत्र लग्नाः कर्मचारिणः प्रेरिता यत् ते स्वीयान् अत्रत्यानुभवान् लिखेयुः अपि च अग्रे अन्येषां जनानां कृते तैः लाभो भवितुं शक्नोति, देशे यदि प्रथमबुलेटरेलयानपरियोजनाप्रयोगः

सफलीभवति तर्हि अग्रे देशे एतस्य कार्यान्वयनदिशि निर्णायकरूपेण मार्गः प्रशस्तो भविष्यति, प्रधानमन्त्रिणा इदमपि कथितं यत् अनुकरणं तदा सार्थकं भविष्यति यदा सुस्पष्टतया तस्य ज्ञानं स्यात् तथा च तदनुरूपमेव प्रयासाः भवेयुः, श्रीमोदिना तत्र परामृश्टं यत् एवंविधकार्यं स्यात् येन अग्रेपि छात्राः एतस्यां दिशि लाभान्विताः प्रेरिताः च भवेयुः, समर्पणभावनया जीनवमत्र समर्पितं स्यात् तदैव देशार्थं वयं किमपि बहुमूल्यं परित्यज्य गच्छामः

<u>सोनभद्र दुर्घटनाः</u>

उत्तरप्रदेशस्य सोनभद्रजनपदे ह्यः एका खननगुहा भूमिसात् संजाता तत्र च कार्यं कुर्वतः एकस्य कर्मिणः मृत्युः संजातः द्वादशाधिकजनाश्च तत्र गुहाबद्धाः सन्ति इति आशङ्क्यते। आपद्प्रबन्धनदलानि स्थानीयप्रशानस्य च आपदामोचनदलानि भूमिसात्-जातानां जनानां संरक्षणाय युद्धस्तरेण कार्यं कुर्वन्ति। नैके विविधसुरक्षमोचनदलानां वरिष्ठाधिकारिणः अपि तत्र विद्यन्ते। अपरआरक्षिमहानिदेशकः पीयूषमोर्डिया वार्ताहरान् असूचयत् यत् ओबरा इत्यस्य बिल्लीमारकुण्डीग्रामे कृष्णामाईंसखानकस्य आभ्यन्तरे एका भित्ति भूमिसात् जाता तत्र च नैके श्रमिका भूमौ निमग्नाः संजाताः एकस्य मृतस्य मृतशरीरमपि अवाप्तमस्ति।

<u>छत्तीसगढ-सुकमा</u>

छत्तीसगढस्य सुकमाजनपदे सुरक्षाबलैः सह जाते परस्परसंघर्षे द्वाभ्यां महिलाविद्रिहिणीभ्यां सह त्रयः माओवादिनः सुरक्षाबलैः मारिताः। आरक्षभिः अनुसारं तुमालपाडक्षेत्रस्य वने माओवादिनानाम् विद्यमानतायाः गुप्तसूचनानन्तरं जनपदीय-रिजर्व-सुरक्षादलेन निरीक्षणाभियाने तत्र अवगतं यत् माओवादिनः मध्ये मध्ये गुलिकाप्रहारान् कुर्वन्ति स्म, सम्प्रति यावत् त्रयाणां माओवादिनां शवाः सुरक्षाबलैः सम्प्राप्ताः सन्ति,। एते माओवादिनः पंचदशलक्षरूप्यकराशिपुरस्कारधारिणः आसन्, सुरक्षाकर्मिभिः घटनास्थलात् एका भुशुण्डिः बीजीएललांचर इति अन्यानि अस्त्राणि विस्फोटकानि चापि अधिकृतानि सन्ति, बस्तररेंजस्य आईजीपी-सुंदरराज-पी अकथयत् यत् आरक्षकाणां सुरक्षाबलानां च अतिरिक्तसैन्यदलानि तस्मिन् क्षेत्रे प्रेषितानि सन्ति।

राष्ट्रियप्रेसदिवसः

अद्य देशे राष्ट्रियप्रेसदिवसः आचर्यते, अयं हि दिवसः भारतीयप्रेसपरिषदः स्थापनायाः प्रतीकभूतो वर्तते, षट्षष्ट्यधिकएकोनविंशे शताब्दे अस्मिन् एव दिवसे संचारतन्त्रं कस्यचित् स्वतन्त्रप्रहरिणः रूपेण कार्यस्य आरम्भम् अकरोत्। केन्द्रियसूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अद्य अवदत् यत् देशस्य लोकतन्त्रे प्रेस इत्यस्य भूमिका महत्त्वपूर्णा विद्यते। नवदेहल्यां राष्ट्रियप्रेसदिवसः पंचविंशत्यधिकद्विसहस्रतमे समारोहे वार्ताहरैः सह भाषमाणः श्रीवैष्णवः अवदत् यत् अस्मिन् अवसरे असमीचीनसूचनातन्त्रस्य कथंचित् समापनं स्यात् अपि च प्रेस इत्यस्य विश्वसनीयतायाः इतोपि द्रढीकरणं स्यात् इत्यस्मिन् विषये व्याख्यानमपि आयोजितम् आसीत्, श्रीवैष्णवः अस्मिन् अवसरे मीडियाजगतः सर्वेषां कार्यकर्तृणां कृते शुभाशयाः अपि प्रदत्तवान्।

ट्रम्पखाद्यायातः

अमेरिकादेशः डोनाल्डट्रम्पः बहुषु खाद्यवस्तुषु आयातशुल्कं न्यूनीकृतवान्। व्हाइटहाउसद्वारा घोषितं यत् उष्टकटीबन्धीयफल-फलरस-चाय-उपस्करादीनि तेषु आयातवस्तुषु सम्मितानि सन्ति येषु पारस्परिककराधास्य कोपि विशिष्टप्रभावो न भविष्यति, अवधेयं यत् पूर्वं श्रीट्रम्पेन भारतात् निर्यातितवस्तुषु पञ्चविंशतिप्रतिशतं शुल्कं स्थापितम् आसीत् अथ च रूसदेशात् तैलायातकारणात् पंचविंशतिप्रतिशतं अतिरिक्तं दण्डात्मकं शुल्कं स्थापितम् आसीत्, मुद्रास्फितेः च नियन्त्रणाय ट्रम्पेन अत्यावश्यकौषधेषु शुल्कं न स्थापितम् आसीत् अपितु करमुक्तता कृता आसीत्, येन च भारतस्य लाभः जातः, अवधेयं यत् भारतदेशः सप्तचत्वारिंशतप्रतिशतं अत्यावश्यकऔषधानाम् आपूर्तिं अमेरिकादेशाय करोति।

पुरुषक्रिकेटदलम्

भारतीयपुरुषक्रिकेटप्रतिस्पर्धायां दक्षिणाफ्रिकादलेन कोलकात्तायाः ईडनगार्डनमध्ये भारतीयक्रिकेटदलं त्रिंशत् धावनाङ्कैः पराजितम्, भारतीयदलं त्रिनवति-धावनाङ्केषु एव समाप्तम् आसीत्, तत्र च अफ्रिकादलेन भारताय चतुर्विंशत्यधिकशतं धावनाङ्कानां लक्ष्यं प्रदत्तं परन्तु भारतीयदलेन तत् न प्राप्तं, अवधेयं यत् दक्षिणाफ्रीकादलस्य टेम्बाबबुमा तत्र पंचपंचाशत् धावनाङ्कानां सर्वाधिकयोगदानं स्वीयदलाय अकरोत्।

।। इति वार्ताः ।।